कर्नाटकप्रशासनम्

# संस्कृतरश्मिः-५

## तृतीयभाषा - संस्कृतम्

दशमी कक्ष्या

(Revised)

द्वितीयः भागः

10

©KTBS
NOT TO BE REPUBLISHED

# SAMSKRITHA RASHMI - 5

## TENTH STANDARD

## THIRD LANGUAGE - SANSKRIT

## PART-2

KARNATAKA TEXTBOOK SOCIETY (R)
6th Cross, Malleshwaram, Bengaluru-560 003.

# पाठानुक्रमणिका

C8Q4M4


| क्र.सं. | | पाठाः | पृष्ठसंख्या |
|---|---|---|---|
| 1. | यदुगिरिः | गद्यम् | 1 |
| 2. | सूक्तिपीयूषम् | पद्यम् – कण्ठपाठः करणीयः | 8 |
| 3. | मुद्राङ्गुलीयकम् | चम्पूः | 15 |
| 4. | अलङ्कारः | व्याकरणम् | 24 |
| 5. | सनातनी नो बध्नाति | पद्यम् | 26 |
| 6. | छन्दः | व्याकरणम् | 32 |
| 7. | दाने सर्वं प्रतिष्ठितम् | नाटकम् | 34 |
| 8. | तद्धितान्तः | व्याकरणम् | 38 |
| 9. | अनुवादः | व्याकरणम् | 41 |
| 10. | पत्राणि | व्याकरणम् | 43 |
| 11. | प्रबन्धाः | व्याकरणम् | 45 |
| क्र.सं. | पूरकपाठाः | | पृष्ठसंख्या |
| 12. | विक्रमः वेतालश्च | कथा | 47 |
| | परिशिष्टम् | | |
| 13. | चित्रकथा | | 51 |
| 14. | गद्यावगाहनम् | | 53 |
| 15. | पदकोश | | 55 |


©KTBS NOT TO BE REPUBLISHED

# मासिकपाठयोजना

| मासाः | पाठाः |
|---|---|
| अक्टोबर् | यदुगिरिः। |
| नवम्बर् | सूक्तिपीयूषम् । मुद्राङ्गुलीयकम् । अलङ्कारः । |
| डिसेम्बर् | सनातनी नो बध्नाति । दोने सर्व प्रतिष्ठितम् । तद्धितान्तः। |
| जनवरि | छन्दः । प्रबन्धः । अनुवादः। विक्रमः वेतालश्च। |
| फेब्रवरि | चित्रकथा । गद्यावगाहनम् । पत्रम्। |
| मार्च् | पुनरावर्तनम् । |

@KTBS
NOT TO BE REPUBLISHED

# प्रार्थना

## शारदाभुजङ्गम्

सुवक्षोजकुम्भां सुधापूर्णकुम्भाम्
प्रसादावलम्बां प्रपुण्यावलम्बाम् ।
सदास्येन्दुबिम्बां सदानोष्ठबिम्बाम्
भजे शारदाम्बामजस्रं मदम्बाम् ।।1।।

कटाक्षे दयार्द्रां करे ज्ञानमुद्राम्
कलाभिर्विनिद्रां कलापैः सुभद्राम्।
पुरस्त्रीं विनिद्रां पुरस्तुङ्गभद्राम्
भजे शारदाम्बामजस्रं मदम्बाम् ।।2।।

ललामाङ्कफालां लसद्गानलोलां।
सभक्तैकपालां यशःश्रीकपोलां।
करे त्वक्षमालां कनत्प्रत्नलोलां
भजे शारदाम्बामजस्रं मदम्बाम् ।।3।।

सुसीमन्तवेणीं दृशा निर्जितैणीं
रमत्कीरवाणीं नमद्वज्रपाणिं।
सुधामन्तरास्यां मुदा चिन्त्यवेणीं
भजे शारदाम्बामजस्रं मदम्बाम् ।।4।।

सुशान्तां सुदेहां दृगन्ते कचान्तां
लसत्सल्लताङ्गीमनन्तामचिन्त्यां।
स्मृतां तापसैः सर्गपूर्वस्थितां तां
भजे शारदाम्बामजस्रं मदम्बाम् ।।5।।

कुरङ्गे तुरङ्गे मृगेन्द्रे खगेन्द्रे
मराले मदेभे महोक्षेऽधिरूढां।
महत्यां नवम्यां सदा सामरूपां
भजे शारदाम्बामजस्रं मदम्बाम् ।।6।।

ज्वलत्कान्तिवह्निं जगन्मोहनाङ्गीं
साम्भोजसुभ्रान्तभृङ्गीं।
निजस्तोत्रसङ्गीतनृत्यप्रभाङ्गी
भजे शारदाम्बामजस्रं मदम्बाम् ।।7।।

भवाम्भोजनेत्राजसम्पूज्यमानां
लसन्मन्दहासप्रभावक्त्रचिह्नां ।
चलच्चञ्चला चारुताटङ्ककर्णां
भजे शारदाम्बामजस्रं मदम्बाम् ।।8।।

@KTBS
NOT TO BE REPUBLISHED

प्रथमः पाठः

# यदुगिरिः

U2U8J2

कर्णाटकराज्यं पुण्यक्षेत्राणां तीर्थक्षेत्राणाम् ऐतिहासिकस्थलानां च सङ्गमभूमिः। ऐतिहासिकेषु तीर्थक्षेत्रेषु अन्यतमस्य मेलुकोटे क्षेत्रस्य परिचयः अत्र प्रदत्तः।

कर्णाटकराज्यस्य मण्ड्यमण्डले नागमङ्गलोपमण्डले शोभते मेलुकोटे इति साधकानां तीर्थक्षेत्रम् । एतत् स्थानं तिरुनारायणपुरं, यादवाद्रिः, नारायणाद्रिः, वेदाद्रिः, यदुगिरिः इत्यपि कथ्यते । 3589 पादपरिमिते उन्नतप्रदेशे यदुगिरिशिखरे निर्मितं दुर्गम् अस्ति इति कारणतः एतत् क्षेत्रं 'मेलुकोटे' इति प्रसिद्धम् अभवत् । दक्षिणभारते विद्यमानेषु चतुर्षु वैष्णवक्षेत्रेषु मेलुकोटे अन्यतमम् । अत्र श्रीचेलुवनारायणस्वामिमन्दिरम् अत्यन्तं सुन्दरम् अस्ति । पर्वतप्रदेशे स्थितं योगनरसिंहमन्दिरम् अपरं सुन्दरं देवस्थानम् । कृतयुगादारभ्य अत्र पूजा प्रचलति इति विशेषः । ब्रह्मणा पूजितः देवः, तस्य मानसपुत्रेण सनत्कुमारेण भूलोके अत्र प्रतिष्ठापितः इत्यभिप्रायः वर्तते ।

NOT TO BE REPUBLISHED © KTBS



तमिलुनाडुराज्ये चोलराजस्य दुष्कृत्यम् असहमानः विशिष्टाद्वैतसिद्धान्तप्रतिपादकः श्रीमद्रामानुजाचार्यः कर्णाटकराज्यस्य तोण्डनूरुग्रामम् आगच्छत् । तदा बिट्टिदेव इति जैनराजः राज्यं परिपालयति स्म । तस्य पुत्री मनोव्याधिना पीडिता आसीत् । पुत्र्याः रोगं निवारयितुं राजा रामानुजाचार्यं प्रार्थितवान् । आचार्यः स्वदिव्यशक्त्या रोगं पर्यहरत् । ततः राजा बिट्टिदेवः वैष्णवमतदीक्षां प्राप्य विष्णुवर्धनो भूत्वा रामानुजाचार्यस्य शिष्यः अभवत् ।



श्रीरामानुजाचार्यः क्रिस्ताब्दे ११२० तमे वर्षे श्रीचेलुवनारायणम् अत्र प्रतिष्ठापितवान् इति ऐतिह्यम् अस्ति । चेलुवनारायणस्वामिमन्दिरम् २८० पादपरिमितं चतुरस्रमस्ति । होय्सल राजा विष्णुवर्धनः अस्य देवालयस्य अभिवृद्धये कारणभूतः

वर्तते । श्रीचेलुवनारायणस्वामिनः मूर्तिः मनोरमा विराजते । अस्य उत्सवमूर्तिः लुण्ठाकैः चोरिता आसीत् । श्रीरामानुजाचार्यः स्वज्ञानदृष्ट्या उत्सवमूर्तिम् अन्विष्यतां मूर्तिम् आनीय उत्सवान् पुनः आरभत । निर्दिष्टदिनेषु स्वामिनं चेलुवनारायणं वैरमुडि, राजमुडि, कृष्णराजमुडि इति विविधैः किरीटैः अलङ्कुर्वन्ति । तत्तद्दिने वैरमुडि, राजमुडि, कृष्णराजमुडि इत्याद्युत्सवाः आचर्यन्ते । वैरमुडि इत्युत्सवः प्रतिवर्षं फाल्गुणमासस्य पुष्यनक्षत्रकाले वैभवेन आचर्यते । रात्रौ एतमुत्सवं वीक्षितुं लक्षाधिकजनाः अत्र आगच्छन्ति ।

पर्वतप्रदेशे स्थितः योगनरसिंहः, भक्तप्रह्लादस्य तपसः फलरूपेण प्रत्यक्षो बभूव इति विश्वासः अस्ति । एषः देवः चतुर्भुजः भव्यमूर्तिरूपः । कल्याणीतीर्थम्, अक्कन कोल, तङ्गिय कोल, रायगोपुरम्, एकशिलानिर्मिताः ६० पादपरिमितोन्नताः निराधाराः चत्वारः स्तम्भाः इत्यादीनि अत्रत्यानि आकर्षकस्थानानि । धनुष्कोटिः इति तीर्थक्षेत्रं देवालयतः अनल्पे दूरे अस्ति । पुराणकथानुसारं श्रीरामः सीतया सह अत्र आजगाम । तदा सीतायाः स्नानार्थं बाणप्रयोगेण अत्र जलोद्गमनं चकार इति कथा श्रूयते ।

क्षेत्रमिदं मण्ड्यनगरात् 36 कि.मी., पाण्डवपुरतः 29 कि.मी., मैसूरुनगरात् 70 कि.मी., बेङ्गलूरुमहानगरात् 157 कि.मी. दूरे अस्ति । अत्र अनेकानि दर्शनीयानि स्थानानि सन्ति । जक्कणाचारि नाम्ना अमरशिल्पिना अर्धनिर्मितानि चत्वारि राजगोपुराणि, पुराणेषु नयनक्षेत्रम् इति प्रसिद्धं गुहालयद्वयं च वर्तन्ते । एकशिलापर्वतम् उत्कीर्य एतौ गुहालयौ निर्मितौ । अत्र श्रीमन्नारायणः केशवरूपेण

© KTBS NOT TO BE REPUBLISHED

दर्शनम् अयच्छत् । दलवायिसरः, होरगम्ममन्दिरम्, संस्कृतसंशोधनसंसत्, कर्नाटकसर्वकारस्य प्रथमा संस्कृतमहापाठशाला 'वेदान्तबोधिनी' महापाठशाला, अष्टतीर्थानि च दर्शनयोग्यानि प्रसिद्धस्थलानि वर्तन्ते ।

*****

## अभ्यासः

### १. एकवाक्येन उत्तरत ।

1. मेलुकोटे कस्मिन् मण्डले अस्ति ?
2. मेलुकोटे इति किमर्थं प्रसिद्धम् अभवत् ?
3. अपूर्णानि राजगोपुराणि केन निर्मितानि ?
4. वैरमुडि इति उत्सवः कदा आचर्यते ?
5. विशिष्टाद्वैतसिद्धान्तप्रतिपादकः कः ?
6. कः राजा श्रीवैष्णवमतदीक्षां स्वीकृतवान् ?

### २. रिक्तस्थानं पूरयत ।

१. ........................ युगादारभ्य अत्र पूजा प्रचलति ।
२. चेलुवनारायणं विविधैः ..................... अलङ्कुर्वन्ति ।
३. ...................... इति तीर्थक्षेत्रम् अनल्पे दूरे अस्ति ।
4. बिट्टिदेवस्य पुत्री .............................. पीडिता ।
5. ............... संस्कृतमहापाठशाला मेलुकोटे क्षेत्रे अस्ति ।

NOT TO BE REPUBLISHED ©KTBS

## ३. विरुद्धपदं लिखत ।

1. उन्नतः 2. अभिवृद्धिः 3. देवः 4. दुष्कृत्यम्

## ४. पर्यायपदानि लिखत ।

1. आचार्यः 2. लुण्ठाकः 3. राजा 4. पर्वतः

## ५. सन्धिं विभज्य नाम लिखत ।

1. वेदाद्रिः 2. चतुर्भुजः 3. पर्यहरत् 4. युगादारभ्य

## ६. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

1. उत्सवमूर्तिः 2. भक्तप्रह्लादः 3. पुराणकथा 4. पाठशाला

## ७. द्वित्रैः वाक्यैः उत्तरं लिखत ।

1. मेलुकोटे क्षेत्रस्य नामान्तराणि कानि ?
2. बिट्टिदेवः किमर्थं श्रीवैष्णवदीक्षां स्वीकृतवान् ?
3. मेलुकोटे क्षेत्रे आकर्षकस्थानानि कानि ?
4. धनुष्कोटिविषये का पुराणकथा श्रूयते ?

## ८. कर्णाटकभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।

1. मेलुकोटे क्षेत्रम् अधिकृत्य लिखत ।
2. मेलुकोटे क्षेत्रे श्रीरामानुजाचार्यस्य योगदानं विवृणुत ।

*****

NOT TO BE REPUBLISHED ©KTBS

## अवधेयांशः

| प्रयोगः | कर्तृपदम् | कर्मपदम् | क्रियापदम् | प्रधानम् |
|---|---|---|---|---|
| 1. कर्तरिप्रयोगः | प्रथमान्तम् | द्वितीयान्तम् | परस्मैपदम्<br>आत्मनेपदम् | कर्ता |
| 2. कर्मणिप्रयोगः | तृतीयान्तम् | प्रथमान्तम् | आत्मनेपदम् | कर्म |
| 3. भावेप्रयोगः | तृतीयान्तम् | नास्ति | आत्मनेपदम् | क्रिया |

| कर्तरि प्रयोगः | कर्मणि प्रयोगः | भावे प्रयोगः |
|---|---|---|
| 1. राधा फलं नयति । | राधया फलं नीयते । | – |
| 2. भवान् देवं वन्दताम् । | भवता देवः वन्द्यताम् । | – |
| 3. अहं पाठं पठिष्यामि । | मया पाठः पठिष्यते । | – |
| 4. लुण्ठाकः धनं चोरितवान् । | लुण्ठाकेन धनं चोरितम् । | – |
| 5. पुत्राः जनकं सेवन्ते । | पुत्रैः जनकः सेव्यते । | – |
| 6. अहं कृतवान् । | मया कृतम् । | – |
| 7. त्वम् अधावः । | – | त्वया अधाव्यत । |
| 8. वृद्धः स्वपिति । | – | वृद्धेन सुप्यते । |
| 9. कन्याः हसन्ति । | – | कन्याभिः हस्यते । |
| 10. शिशुः रोदिति । | – | शिशुना रुद्यते । |

*****

©KTBS NOT TO BE REPUBLISHED

## क्रियाकलापः

* प्रेक्षणीयान् अंशान् तत्सम्बद्धैः प्रेक्षणीयस्थलैः सह रेखाभिः संयोजयत ।

| प्रेक्षणीयः अंशः | प्रेक्षणीयं स्थलम् |
|---|---|
| शारदाम्बा | धर्मस्थलम् |
| गोलगुम्बज् | शिरसि |
| बाहुबलिः | शृङ्गगिरिः |
| महाबलेश्वरः | सवदत्ति |
| सेन्ट् फिलोमिना चर्च् | विजयपुरम् |
| मारिकाम्बा | गोकर्णः |
| मञ्जुनाथस्वामी | कूडलसङ्गमः |
| एल्लम्मा | बेङ्गलूरु |
| बसवेश्वरः | मैसूरु |
| विधानसौधः | श्रवणबेलगोल |

@KTBS NOT TO BE REPUBLISHED

द्वितीयः पाठः

# सूक्तिपीयूषम्

कण्ठपाठः करणीयः

सूक्तिः नाम सुभाषितम् । संस्कृतसाहित्ये बहूनि रम्याणि सुभाषितानि दृश्यन्ते । सुभाषितानि नीतिं, तत्त्वं, लोकव्यवहारं च बोधयन्ति । तेषाम् अध्ययनेन ज्ञानं व्यवहारकौशलं च वर्धते ।

1. शीलं शौर्यमनालस्यं पाण्डित्यं मित्रसङ्ग्रहः ।
   अचोरहरणीयानि पञ्चैतान्यक्षयो निधिः ॥

2. सदयं हृदयं यस्य भाषितं सत्यभूषितम् ।
   कायः परहिते यस्य कलिस्तस्य करोति किम् ॥

3. शिक्षा क्षयं गच्छति कालपर्ययात्
   सुबद्धमूला निपतन्ति पादपाः ।
   जलं जलस्थानगतं च शुष्यति
   हुतं च दत्तं च तथैव तिष्ठति ॥

4. आरम्भगुर्वी क्षयिणी क्रमेण
   लघ्वी पुरा वृद्धिमती च पश्चात् ।
   दिनस्य पूर्वार्धपरार्धभिन्ना
   छायेव मैत्री खलसज्जनानाम् ॥

Z5K6Q2

© KTBS NOT TO BE REPUBLISHED

5. मनसि वचसि काये पुण्यपीयूषपूर्णाः
त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून्पर्वतीकृत्य नित्यं
निजहृदि विलसन्तस्सन्ति सन्तः कियन्तः ।।

*****

## अन्वयार्थः

1. **शीलम्** = सच्चारित्र्यम्, **शौर्यम्** = शूरता, **अनालस्यम्** = सक्रियता, **पाण्डित्यम्** = वैदुष्यम्, **मित्रसङ्ग्रहः** = सुहृदां समूहः, **एतानि** = इमानि, **पञ्च** = पञ्च विषयाः, **अचोरहरणीयानि** = चोरैः अपहर्तुम् अशक्यानि, **अक्षयः**= अक्षीणः, **निधिः**= सम्पत्।

**तात्पर्यम्** - सच्चारित्र्यं, शूरता, चातुर्यं, प्राज्ञता, स्नेहसमूहः इति पञ्च सम्पदः चोरैः अपहर्तुम् अशक्याः ।

2. **यस्य** = यस्य मनुष्यस्य, **हृदयम्** = चित्तम्, **सदयम्** = कृपापूर्णम्, **भाषितम्** = वचनम्, **सत्यभूषितम्** = सत्यभूयिष्ठम्, **यस्य** = यस्य मनुष्यस्य, **कायः** = शरीरम्, **परहिते** = अन्येषाम् उपकाराय भवति, **तस्य** = तस्य मनुष्यस्य, **कलिः** = कलिपुरुषः, **किं करोति** = किं कर्तुं शक्नोति।

**तात्पर्यम्** – यस्य मनुजस्य मनः करुणापूर्णं, वचनं सत्ययुक्तं, देहः परोपकाराय च भवति तं पुरुषं कालपुरुषः किमपि कर्तुं न शक्नोति ।

3. **कालपर्ययात्** = कालक्रमेण, **शिक्षा** = विद्या, **क्षयम्** = नाशम्, **गच्छति** = प्राप्नोति, **सुबद्धमूलाः** = रूढमूलाः, **पादपाः** = वृक्षाः, **निपतन्ति** = धराशायिनः भवन्ति, **जलस्थानगतम्** = नदीतटाकादिगतम्, **जलम्** = तोयम्, **शुष्यति** = शुष्कीभवति, **हुतं च** = कृतं हवनादिकं पुण्यकर्म, **दत्तं च** = कृतं दानं च, **तथा एव** = तद्वत् शाश्वतम् एव,

© NCERT NOT TO BE REPUBLISHED

**तिष्ठति** = चिरकालं स्थास्यति ।

**तात्पर्यम् -** कालक्रमेण अधीता विद्या अपि अनभ्यासेन क्षीणा भवति, गच्छति काले रूढमूलाः वृक्षाः अपि नाशं गच्छन्ति, कालान्तरेण जलाशयाः अपि शुष्काः भवन्ति । किन्तु हवनादिकस्य पुण्यकर्मणः फलं दानादिकस्य फलं च शाश्वतं तिष्ठति ।

4. **आरम्भगुर्वी** = प्रारम्भे दीर्घा, **क्रमेण** = कालान्तरे, **क्षयिणी** = क्षीयमाणा, **पुरा** = पूर्वम्, **लघ्वी** = क्षीणा, **पश्चात्** = अनन्तरम्, **वृद्धिमती च** = वर्धमाना च, **दिनस्य** = दिवसस्य, **पूर्वार्धपरार्धभिन्ना** = पूर्वाह्णापराह्णयोः भिन्नरूपा, **छाया इव** = आतपछाया इव, **खलसज्जनानां** = दुर्जनसज्जनानां, **मैत्री** = मित्रता भवति ।

**तात्पर्यम्** - दुर्जनैः सह क्रियमाणा मित्रता पूर्वाह्णस्य छायेव आदौ दीर्घा पश्चात् क्षयिणी, तथा सुजनैः सह क्रियमाणा मैत्री अपराह्णस्य छायेव आदौ क्षयिणी तदनु दीर्घा च भवति ।

5. **मनसि** = चित्ते, **वचसि** = वचने, **काये** = शरीरे, **पुण्यपीयूषपूर्णाः** = पुण्यामृतपूर्णाः, **त्रिभुवनम्** = लोकत्रयम्, **उपकारश्रेणिभिः** = उपकारसहस्रैः, **प्रीणयन्तः** = तृप्तं कुर्वन्तः, **परगुणपरमाणून्** = अन्यसद्गुणलवलेशान्, **पर्वतीकृत्य** = पर्वतवत् बृहत्कृत्वा, **नित्यम्** = सदा, **निजहृदि** = स्वान्तःकरणे, **विलसन्तः** = विराजमानाः, **सन्तः** = सज्जनाः, **कियन्तः** = कति, **सन्ति** = वर्तन्ते ।

**तात्पर्यम्** - मनोवाक्कायेषु पुण्यामृतपूर्णाः, त्रिलोकम् अपि उपकारसहस्रैः तर्पयन्तः, अन्यजनेषु विद्यमानान् सद्गुणलवलेशानपि पर्वतवत् बृहत्कृत्वा वर्णयन्तः स्वयं निजहृदि विलसन्तः सन्तः अङ्गुलीगणनीयाः एव सन्ति ।

*****

© KTBS NOT TO BE REPUBLISHED

## अभ्यासः

### १. एकवाक्येन उत्तरत ।

1. अक्षयाः निधयः कति सन्ति ?
2. कालपर्ययात् का क्षयं गच्छति ?
3. किं तथैव तिष्ठति ?
4. केषां मैत्री छायेव भवति ?
5. सन्तः कान् पर्वतीकुर्वन्ति ?

### २. रिक्तस्थानं पूरयत ।

1. .......................... पूर्वार्धपरार्धभिन्ना ।
2. जलं .......................... च शुष्यति ।
3. पञ्चैतानि .......................... निधिः ।
4. .............................. सत्यभूषितम् ।
5. मनसि वचसि काये ........................ ।

@KTBS NOT TO BE REPUBLISHED

### ३. संयोजयत ।

| | अ | आ |
|---|---|---|
| 1. | सुबद्धमूलाः | विलसन्तः |
| 2. | मित्रसङ्ग्रहः | सदयम् |
| 3. | लघ्वी | निधिः |
| 4. | सन्तः | गुर्वी |
| 5. | हृदयम् | पादपाः |

## ४. विरुद्धपदं लिखत ।

1. क्षयिणी
2. अक्षयः
3. उपकारः
4. पीयूषम्

## ५. पर्यायपदं लिखत ।

1. कायः
2. पश्चात्
3. शिक्षा
4. सन्तः

## ६. सन्धिं विभज्य नाम लिखत ।

1. कलिस्तस्य
2. छायेव
3. तथैव
4. पञ्चैतानि

## ७. श्लोकं पूरयत ।

1. शीलं शौर्यम् .......................... ।
   ............................... निधिः ।।
2. सदयं ................................ ।
   ............................... किम् ।।

## ८. द्वित्रैः वाक्यैः उत्तरं लिखत ।

1. पञ्च अचोरहरणीयानि कानि ?
2. कालान्तरे कानि विनश्यन्ति ?
3. खलसज्जनानां मैत्री कीदृशी भवति इति वर्णयत ।
4. सन्तः कीदृशाः भवन्ति इति विवृणुत ।

*****

@KTBS NOT TO BE REPUBLISHED

## अवधेयांशः

### केचन सुभाषितग्रन्थाः

| ग्रन्थकर्ता | ग्रन्थः |
|---|---|
| शार्ङ्गधरः | शार्ङ्गधरपद्धतिः |
| जल्हणः | सूक्तिमुक्तावलिः |
| वल्लभदेवः | सुभाषितावली |
| विजयसेनसूरिः | सूक्तिरत्नावली |
| सुन्दरदेवः | सूक्तिसुन्दरः |
| कुसुमदेवः | दृष्टान्तकलिका |
| विद्याधरः | कवीन्द्रवचनसमुच्चयः |

| ग्रन्थकर्ता | ग्रन्थः |
|---|---|
| सायणाचार्यः | सुभाषितसुधानिधिः |
| सिद्धचन्द्रमणिः | सूक्तिरत्नाकरः |
| श्रीधरदासः | सदुक्तिकर्णामृतम् |
| शिल्हणः | शान्तिशतकम् |
| हरिदासः | प्रस्तावरत्नाकरः |
| अमितगतिः | सुभाषितरत्नसन्दोहः |
| हरिकविः | सुभाषितहारावली |

@KTBS NOT TO BE REPUBLISHED

**प्रहेलिका**

**कृष्णवर्णो न गोपालो विश्वरूपप्रदर्शकः ।**
**सर्वस्य हृदयाकर्षो गेहे गेहे वसाम्यहम् ।।**

**उत्तरम् - दूरदर्शनम्**

## क्रियाकलापः

* नामपदं, सर्वनाम, अव्ययं, क्रियापदं च पृथक् कृत्वा कोष्टके लिखत।

शीलं, करोति, कायः, तेन, किम्, शिक्षा, च, शुष्यति, कियन्तः, एव, यस्य, उपैति, चेतः, तिष्ठति, तस्मात्, यत्र, गच्छति, मङ्गलं, यथा, तदा, जलं, येन, कलिः, इव, मैत्री, पुरा, पश्चात्, दिनम्, पाण्डित्यम्

| नामपदम् | सर्वनाम | अव्ययम् | क्रियापदम् |
|---|---|---|---|
| | | | |
| | | | |

@KTBS
NOT TO BE REPUBLISHED

## तृतीयः पाठः

# मुद्राङ्गुलीयकम्

W8I1X9

श्रव्यकाव्येषु अन्यतमः भेदः चम्पूः । गद्यपद्यात्मकं काव्यं चम्पूरित्यभिधीयते। संस्कृतवाङ्मये चम्पूरामायणं, चम्पूभारतं, पारिजातहरणचम्पूः इत्यादीनि काव्यानि प्रसिद्धानि । तेषु चम्पूरामायणस्य सुन्दरकाण्डात् अयं भागः सङ्गृहीतः । रामदूतः हनूमान् समुद्रम् उल्लङ्घ्य लङ्कां गत्वा सीताम् अन्विष्य रामाङ्गुलीयकं तस्यै प्रायच्छत्। पश्चात् सीतायाः चूडामणिं स्वीकृत्य रामाय समर्पयितुं ततः प्रस्थितः ।



१. ततो हनूमान्दशकण्ठनीतां
सीतां विचेतुं पथि चारणानाम् ।
महेन्द्रशैलस्य खगेन्द्रवेगः
प्रस्थादुदस्थात् प्रथमानवेगः ।।

२. तदनु पारावारस्य पारे लम्बशिखरिणि लम्बमानः प्रतनुतरवपुः लङ्कापुरोत्तरगोपुरद्वारम् आसाद्य नितान्तचिन्तातन्तुसंतानितान्तःकरणोऽभूत्।

३. वानरसेना कथं तरेदिममन्तरायं वितन्वन्तमुदन्वन्तं, तरतु नाम, कथमुपयातु यातुधानराजधानीमिमां, सर्वथा वितथमनोरथो दाशरथिः, मोघीकृतार्णवलङ्घनः केवलमहमभवम्, जीविता वा न वेति न जानामि जानकीति तत्रभगवतीं सीताम् अवजिगमिषुराञ्जनेयः, प्रच्छन्नसञ्चारहेतोरस्तमयं गभस्तिमालिनः केवलमभिललाष ।

४. ततस्तस्यां नाग-पुंनाग-ताल-हिन्ताल-तमाल-कृतमाल-(सरल-बकुल-वञ्जुल-तिलक-आमलक-कुटज-लिकुच-कतक-कक्कोल-अङ्कोल-लवङ्ग-विकङ्कत-केतकी-कदम्ब-उदुम्बर-कपित्थ-अश्वत्थ-)

©KTBS NOT TO BE REPUBLISHED

कुरबक-मरुबक-माकन्द-कुन्द-तिन्दुक-चन्दन-स्यन्दन-चम्पक-चाम्पेय-पनस-वेतस-पलाश-पाटला-रसाल-प्रियालु-प्रायैरनेकै:अनोकहनिवहै: परिवृतायां परिभ्रमन् अभ्रङ्कष-विकट-विटप-निबिडित-गगनप्रपञ्चां काञ्चन काञ्चनमयीं शिंशपामारुरोह ।



५. पुनरयम् एनामालोक्यैवं चिन्तां ततान ।

६. ज्योत्स्नां विनापि निवसेन्निशि शीतभानु-
श्छायां विनापि विलसेद्दिवसेश्वरोऽपि ।
एनां विना रघुपतिः परिगृह्य धैर्यम्
सप्राण एव वसतीति विचित्रमेतत् ।।

७. सोऽपि समवतीर्य वचनवैचित्र्याज्ज्ञनकपुत्रीं प्रत्याययितुमाञ्जनेयः कृताञ्जलिर्व्यजिज्ञपत् ।

८. कल्याणि ! त्वद्वियोगेन तीव्रवेगेन ताम्यतः ।
राघवेन्द्रस्य दूतं मामन्यथा मा स्म मन्यथाः ।।



©KTBS NOT TO BE REPUBLISHED

९. एवमभिहितया तया संभूतविस्रम्भतया भयादपेतया तावदनुयुक्तः पवनतनयो वालिमरणकारणं सुग्रीवस्य सख्यमाख्याय प्राचेतसचेत इव सन्ततसंनिहितरामनाममङ्गलम् अङ्गुलीयकमस्यै प्रायच्छत् ।

१०. सैषा परिचितकथास्मरणात् द्विगुणितदुर्दशा केशपिनद्धम परमिदम् अभिज्ञानमुन्मुच्य।

११. चूडामणिं कपिवरस्य ददौ दशास्य -
संत्रासपुञ्जितरुषाग्निदशं कृशाङ्गी ।
आदाय तत्प्रणतिपूर्वमसौ प्रतस्थे
माणिक्यगर्भवदनोरगतुल्यबाहुः ॥

*****

*दूरीकृतसीतार्तिः प्रकटीकृतरामवैभवस्फूर्तिः ।*
*दारितदशमुखकीर्तिः पुरतो मम भातु हनूमतो मूर्तिः ॥*

NOT TO BE REPUBLISHED ©KTBS

## कविकाव्यपरिचयः



**कविः** – भोजराजः ।

**देशः** – मालवदेशः ।

**कालः** – एकादशशतकम् ।

**कृतयः** – तत्त्वप्रकाशः, सरस्वतीकण्ठाभरणम्, शृङ्गारप्रकाशः, सिद्धान्तसङ्ग्रहः, समराङ्गणसूत्रधारः, सुभाषितप्रबन्धः चम्पूरामायणम् इत्यादयः ।

## तात्पर्यम्

१. ततः वानरनायकस्य सुग्रीवस्य आदेशानन्तरं द्रुतगतिः, गरुडसमानवेगः, आञ्जनेयः रावणेन अपहृतां सीताम् अन्वेष्टुं गन्धर्वादीनां मार्गे आकाशे गन्तुं महेन्द्रपर्वतस्य शिखरात् उल्लङ्घयामास ।

२. तदनु दुस्तरं समुद्रम् उल्लङ्घ्य अपरतीरे वर्तमाने लम्बपर्वते अवतीर्य सूक्ष्मशरीरः सन् मारुतिः लङ्कायाः उत्तरद्वारगोपुरे उपविश्य अनन्तचिन्तया आक्रान्तान्तरङ्गः बभूव ।

३. वानरसेना अनेकविघ्नोत्पादकं समुद्रम् इमं कथं लङ्घयेत् ? यथाकथंचित् सागरं तरति चेदपि इमां राक्षसराजधानीं लङ्कां कथं प्राप्नुयात्? सर्वथा श्रीरामः व्यर्थसङ्कल्पः भविष्यति । अहमपि विफलीकृतसमुद्रलङ्घनः अभवम् । जानकी तु जीविता वा न वा इति अपि अहं न जाने इत्येवं बहुधा विचिन्त्य पूज्यां सीताम् अन्वेष्टुं रहस्यसञ्चारनिमित्तं सूर्यास्तः भवतु इति मारुतिः अभिललाष ।

४. ततः नागदन्तक - देववल्लभ - तृणराजाह्वय - श्रीताल - तापिच्छ - आरग्वध -देवदारुविशेष - केसर - अशोक - क्षुरक - तिष्यफल - गिरिमल्लिका - लकुच - जलपङ्कशोधकबीजवृक्षविशेष - कोशफल - निकोचक - देवकुसुम - सुवावृक्ष - तृणद्रुमविशेष - नीप - जन्तुफल - दधिफल - चलदल - रक्तकुरण्टक - पिण्डीतक - चूतविशेष - माघ्य - स्फूर्जक - मलयज - तिनिश - हेमपुष्पक - नागकेसर - कण्टकिफल - नीवार - किंशुक - फलेरुह - चूत - राजादनादिप्रचुरैः बहुभिः वृक्षवृन्दैः परिपूर्णायाम् अशोकवनिकायां सीतादर्शनार्थम् इतस्ततः सञ्चरन् आञ्जनेयः अत्युन्नतभीकरतरुभिः आच्छादिताकाशां काञ्चित् हिरण्मयीम् अगरुविटपीम् आरुरोह ।

५. पुनः एषः हनूमान् शिंशपावृक्षस्य अधः उपविष्टाम् एतां सीताम् अवलोक्य इत्थं विचारं चकार ।

@KTBS NOT TO BE REPUBLISHED

६. चन्द्रिकां विहाय अपि रात्रौ चन्द्रः निवसेत् । सूर्यः च निजभार्यां छायां विना विलसेत् । एतत् न विचित्रम् । किन्तु सीतां विना श्रीरामः मनस्स्थैर्यम् अवलम्ब्य सजीवः एव वसति इति अयं विचारः आश्चर्यजनकः।

७. सः आञ्जनेयः च वृक्षात् अवरुह्य तत्कालोचितचतुरवचनैः जानकीं समाश्वासयितुं नमस्कुर्वन् एवं विज्ञापनं चकार ।

८. हे सुमङ्गले जानकि ! दुर्निरोधेन त्वद्विरहेण तप्यतः श्रीरामस्य दूतं माम् आञ्जनेयम् अन्यथा अन्यः इति न चिन्तयतु ।

९. एवं हनूमद्वचनात् संजातविश्वासेन भयमुक्ता सीता 'कथं भवान् श्रीरामस्य दूतः संजातः?' इत्यादिकं प्रश्नं हनूमन्तम् अपृच्छत् । तदा पवनतनयः वालिमरणकारणं, रामसुग्रीवयोः मैत्रीं च कथयित्वा वाल्मीकिमनः इव निरन्तरसंनिकृष्टेन रामनाम्ना मुद्रितं श्रीरामप्रेषितं मङ्गलं रामाङ्गुलीयकं सीतायै प्रददौ ।

१०. सा पूर्वानुभूतवृत्तान्तस्मृत्या द्विगुणितदुरवस्था सीता अभिज्ञानं दातुं केशपाशावृतं चूडामणिम् उन्मुमोच ।

११. रावणस्य हिंसापीडनादिभिः पिण्डीभूतं सीताक्रोधाग्निरूपं शिरोरत्नं चूडामणिं रामाय दातुम् आञ्जनेयाय कृशाङ्गी सीता प्रददौ । नमस्कारपूर्वकं तं चूडामणिं स्वीकृत्य सर्पसदृशदीर्घबाहुः मारुतिः अशोकवनात् प्रतस्थे ।

*****

©KTBS NOT TO BE REPUBLISHED

**अभ्यासः**

## १. एकवाक्येन उत्तरत ।

१. चम्पूरामायणस्य कर्ता कः ?

२. सीतां कः अपहृतवान् ?

३. लङ्कानगरं केषां राजधानी ?

४. हनूमान् सीतायै किं प्रायच्छत् ?

५. कम् आदाय हनूमान् लङ्कातः प्रतस्थे ?

## २. रिक्तस्थानं पूरयत ।

1. ..................... विनापि निवसेन्निशि शीतभानुः ।
2. सीतां विचेतुं पथि ............................. ।
3. गद्यपद्यात्मकं ................... चम्पूरित्यभिधीयते ।
4. अन्यथा मास्म ................................... ।

## ३. संयोजयत ।

| | अ | आ |
|---|---|---|
| 1. | दशकण्ठः | आञ्जनेयः |
| 2. | जानकी | सूर्यः |
| 3. | दाशरथिः | रावणः |
| 4. | हनूमान् | सीता |
| 5. | दिवसेश्वरः | श्रीरामः |

@KTBS NOT TO BE REPUBLISHED

## ४. सन्धिं विभज्य नाम लिखत ।

1. सोऽपि 2. महेन्द्रः 3. सैषा 4. वसतीति

## ५. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

1. दशास्यः 2. खगेन्द्रः 3. शीतभानुः 4. राघवेन्द्रः

## ६. श्लोकतात्पर्यं कर्णाटकभाषया आङ्ग्लभाषया वा लिखत ।

1. ततो हनूमान्दशकण्ठनीतां सीतां विचेतुं पथि चारणानाम् ।
महेन्द्रशैलस्य खगेन्द्रवेगः प्रस्थादुदस्थात् प्रथमानवेगः ।।

2. कल्याणि ! त्वद्वियोगेन तीव्रवेगेन ताम्यतः ।
राघवेन्द्रस्य दूतं मामन्यथा मा स्म मन्यथाः ।।

## ७. द्वित्रैः वाक्यैः उत्तरं लिखत ।

1. हनूमान् महेन्द्रशैलात् कथम् उदस्थात् ?
3. हनूमान् कथं सीतां स्वपरिचयम् उक्तवान् ?
3. हनूमान् किम् इति चिन्तां ततान ?
4. रामः सीतां विना कथं वसति ?

*****

NOT TO BE REPUBLISHED © KTBS

## अवधेयांशः

### सर्वनाम

**नामपदानां स्थाने अथवा नामपदैः सह सर्वनामशब्दाः प्रयुज्यन्ते । नाम पदस्य लिङ्गं वचनं, विभक्तिः एव सर्वनामशब्दस्य अपि भवन्ति ।**

यथा –

| **वाक्यम्** | **नामपदं** | **सर्वनाम** |
|---|---|---|
| 1. रामः पठति । सः चतुरः अस्ति । | रामः | सः |
| 2. माला गायति । सा नृत्यति च । | माला | सा |
| 3. उद्यानम् अस्ति । तत् सुन्दरम् अस्ति । | उद्यानम् | तत् |

@KTBS NOT TO BE REPUBLISHED

**अद्य धारा निराधारा निरालम्बा सरस्वती ।**
**पण्डिताः खण्डितास्सर्वे भोजराजे दिवङ्गते ॥**

**अद्य धारा सदाधारा सदालम्बा सरस्वती ।**
**पण्डिताः मण्डितास्सर्वे भोजराजे भुवङ्गते ॥**

## क्रियाकलापः

*** मञ्जूषागतैः समुचितैः सर्वनामशब्दैः वाक्यानि पूरयत ।**

| तस्यां, ते, सः, तस्मिन्, तस्याः, तेभ्यः, तस्मात्, ताभ्यः |
|---|

1. राघवेन्द्रः पठति । ................................ लिखति च ।
2. सीतायाः माता आगच्छति । ...................... पिता अपि ।
3. शाखायां फलानि सन्ति । ........................ कपयः अपि ।
4. गृहे शुनकः अस्ति । ............................ मार्जारः अपि ।
5. मित्रेभ्यः पुस्तकं ददाति । ...................... लेखनीम् अपि ।
6. बालिकाभ्यः धनं यच्छति । ........................ वस्त्रमपि ।
7. छात्राः संस्कृतपद्यं वदन्ति । ...................... गायन्ति च ।
8. ग्रामात् आगच्छति । ...................... धान्यानि आनयति ।

©KTBS NOT TO BE REPUBLISHED

**प्रहेलिका**

**दण्डधारी न संन्यासी द्युतिमान्नैव भास्करः ।**
**मन्दबुद्धेरहं संज्ञा न मेघश्चपलायुतः ।।**

**उत्तरम् - दण्डदीपः**

चतुर्थः पाठः

# अलङ्कारः

C4A3T4

मनुष्यस्य आत्मा, शरीरम्, इन्द्रियाणि, अलङ्करणवस्तूनि यथा भवन्ति तथैव काव्यस्य रसः, गुणाः, अलङ्काराः च भवन्ति । “येन काव्यस्य सौन्दर्यम् अभिवर्ध्यते सः अलङ्कारः।” अयं च अलङ्कारः शब्दालङ्कारः अर्थालङ्कारः इति द्विविधः।

1. **शब्दालङ्कारः** – यत्र शब्दैः काव्यस्य सौन्दर्यं वर्धते तत्र शब्दालङ्कारः। यथा-

नितान्तकान्तदन्तकान्तिमन्तकान्तकात्मजम्
अचिन्त्यरूपमन्तहीनमन्तरायकृन्तनम् ।
हृदन्तरे निरन्तरं वसन्तमेव योगिनाम्
तमेकदन्तमेव तं विचिन्तयामि सन्ततम् ।।

2. **अर्थालङ्कारः** – यत्र अर्थविशेषैः काव्यस्य सौन्दर्यं वर्धते तत्र अर्थालङ्कारः । यथा उपमारूपकादयः अर्थालङ्काराः । पाठेऽस्मिन् चतुर्णाम् अर्थालङ्काराणां परिचयः क्रियते ।

## १. श्लेषालङ्कारः

**लक्षणम्** – **‘नानार्थसंश्रयः श्लेषः’**

**विवरणम्** – यत्र वाक्ये पदे वा अनेकार्थाः भासन्ते तत्र श्लेषालङ्कारः ।

**उदाहरणम्** – ‘सर्वदो माधवः पायात्’ ।

**समन्वयः** – अत्र सर्वदः माधवः रक्षतु इति एकः अर्थः । सर्वदा उमाधवः शिवः रक्षतु इति अपरः अर्थः । अतः अत्र श्लेषालङ्कारः ।

© KTBS NOT TO BE REPUBLISHED

## २. अनन्वयालङ्कारः

**लक्षणम्** – **'उपमानोपमेयत्वं यदैकस्यैव वस्तुनः'**
**विवरणम्** – यत्र एकमेव वस्तु उपमानं उपमेयं च भवति तत्र अनन्वयालङ्कारः ।
**उदाहरणम्** – 'रामरावणयोर्युद्धं रामरावणयोरिव' ।
**समन्वयः** – अत्र रामरावणयुद्धमेव उपमानम् उपमेयं च अस्ति । रामरावणयुद्धेन समानं रामरावणयुद्धमेव इति वर्ण्यते । अतः अत्र अनन्वयालङ्कारः ।

*****

## अभ्यासः

### १. एकवाक्येन उत्तरत ।

1. अलङ्कारः नाम कः ?
2. अलङ्कारस्य भेदौ कौ ?
3. शब्दालङ्कारः नाम कः ?
4. अर्थालङ्कारः नाम कः ?
5. उपमालङ्कारे कति अंशाः भवन्ति ?

### २. रिक्तस्थानं पूरयत ।

1. उपमा यत्र .................. उल्लसति द्वयोः ।
2. विषय्यभेदताद्रूप्यरञ्जनं ................. यत् ।
3. ...................................... श्लेषः ।
4. ......................... यदैकस्यैव वस्तुनः ।

### ३. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत ।

1. सोमदत्तः अभिमन्युः इव शूरः ।
2. गगनं गगनाकारं सागरः सागरोपमः ।
3. मुखारविन्दे विनिवेशयन्तम् ।
4. कादम्बरीरसज्ञानाम् आहारोऽपि न रोचते ।

© KTBS NOT TO BE REPUBLISHED

F6B1I7

### पञ्चमः पाठः

# सनातनी नो बध्नाति

भारतदेशः विविधजातिमतपथानुसारिभिः संवृत्तः । भारतीयानां वेषभाषाभूषासु आचारविचारव्याहारव्यवहारादिषु वैविध्यं दृश्यते । तथापि भारतस्य 'वैविध्ये ऐक्यं' तु लोके आश्चर्यं जनयति । तत्र कारणं सनातनी संस्कृतिः इति अत्र पद्ये प्रतिपाद्यते।



भाषा भिन्ना वेषो भिन्नः
नीतिर्भिन्ना नियमो भिन्नः ।
भिन्ना जातिः भिन्नश्च कुलम्
भिन्नावेव हि मतधर्मौ ।।1।।

अशनं भिन्नं वसनं भिन्नम्
रूपं भिन्नं रीतिरपि ।
भिन्नं भाग्यं भिन्नो वर्णः
भिन्नं सर्वं भेददृशे ।।2।।

परमस्माकं त्वेको देशः
परम्परा नस्त्वेकैव ।
सिद्धिसाधने श्रद्धास्थानम्
ध्येयोद्देशौ न तु भिन्नौ ।।3।।



हिमालयो नः पूज्यश्शैलः
पूज्यनदी सा गङ्गाम्बा ।
साहित्यं नस्सङ्गीतमपि
भाषाभेदेऽप्येकमिह ।।4।।

भेदे

@KTBS NOT TO BE REPUBLISHED

बहुत्र बहुधा दृष्टेऽपि ।
आन्तरङ्गिकी संस्कृतिरेका
सनातनी नो बध्नाति ।।5।।

अत उच्चैरुद्घोषः क्रियते
नैव च भेदोऽस्त्यस्मासु ।
भारतदेशे जनता सर्वा
समा न भेदः कश्चिदपि ।।6।।

*****

## शब्दार्थः

**अशनम्** = आहारः, **वसनम्** = वस्त्रम्, **भेददृशे** = भेदभावयुताय, **पूज्यः** = श्रेष्ठः, **शैलः** = पर्वतः, **उद्घोषः** = घोषणम्, **कुलम्** = वंशः, **भाग्यम्** = अदृष्टम्, **सनातनी** = प्राचीना, **नः** = अस्मान्, **बध्नाति** = बन्धयति, **समा** = समाना

## कविकृतिपरिचयः



**कविः** – डा. बा. श्री. रामकृष्णराव् ।

**देशः** – बासूरु, तरिकेरे, चिक्कमंगलूरुमण्डलम्, कर्णाटकम्।

**कालः** – क्रि.श. 1952 तः 2007 ।

**कृतयः** – पद्यमणिमाला, गद्यरत्नमञ्जूषा, हास्यमधुबिन्दवः, तिलोत्तमा, रसहृदयतन्त्रम्, गद्यलेखावली, विदुरनीतिः, चाणक्यनीतिः इत्यादयः।

**वृत्तिः** – बसवनगुडि न्याषनल् महाविद्यालये अयं संस्कृतप्राध्यापकः आसीत्। अखिलकर्णाटकसंस्कृतपरिषदः, विश्वसंस्कृतप्रतिष्ठानस्य, सुरसरस्वतीसभायाः च कार्यदर्शी आसीत्। मेक्सिको नगरस्य भारतीयविद्याभवने निर्देशकः आसीत्।

©KTBS NOT TO BE REPUBLISHED

## अभ्यासः

### १. एकवाक्येन उत्तरत ।

1. भिन्नौ कौ ?
2. अस्माकं का एका एव ?
3. पूज्यः शैलः कः ?
4. पूज्यनदी का ?
5. का अस्मान् बध्नाति ?

### २. रिक्तस्थानं पूरयत ।

1. भाषा भिन्ना .............. भिन्नः ।
2. भिन्नं ................ भिन्नो वर्णः ।
3. परमस्माकं त्वेको ............... ।
4. साहित्यं नः ..................... ।
5. आन्तरङ्गिकी ...................... ।

### ३. संयोजयत ।

| | अ | आ |
|---|---|---|
| 1. | ध्येयोद्देशौ | सम्प्रदायः |
| 2. | सिद्धिसाधने | न तु भिन्नौ |
| 3. | अशनम् | घोषणम् |
| 4. | उद्घोषः | आहारः |
| 5. | परम्परा | श्रद्धास्थानम् |

@KTBS NOT TO BE REPUBLISHED

**४. पर्यायपदं लिखत ।**

1. वसनम्  2. नदी
3. शैलः  4. भाषा

**५. श्लोकतात्पर्यं कर्णाटकभाषया आङ्ग्लभाषया वा लिखत।**

1. हिमालयो नः पूज्यश्शैलः पूज्यनदी सा गङ्गाम्बा ।
   साहित्यं नस्सङ्गीतमपि भाषाभेदेऽप्येकमिह ।।
2. अत उच्चैरुद्घोषः क्रियते नैव च भेदोऽस्त्यस्मासु ।
   भारतदेशे जनता सर्वा समा न भेदः कश्चिदपि ।।

**६. कर्णाटकभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. भारतस्य विविधतायाम् एकतां वर्णयत ।
2. पद्यस्य तात्पर्यं सङ्गृह्य लिखत ।

*****

@KTBS NOT TO BE REPUBLISHED

## अवधेयांशः

### विशेष्यविशेषणभावः

**“यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य ।**
**तल्लिङ्गं तद्वचनं सा च विभक्तिर्विशेषणस्य ।।”**

**विशेष्यस्य नामपदस्य विशेषणस्य गुणवाचकस्य च लिङ्गं, वचनं, विभक्तिः च समानानि एव भवन्ति इति सामान्यः नियमः। यथा -**

| | विशेषणम् | विशेष्यम् | | विशेषणम् | विशेष्यम् |
|---|---|---|---|---|---|
| 1. | सुन्दरः | बालकः | 1. | सुन्दराः | बालकाः |
| 2. | सुन्दरी | बालिका | 2. | सुन्दर्यः | बालिकाः |
| 3. | सुन्दरं | नगरम् | 3. | सुन्दराणि | नगराणि |
| 4. | उत्तमेन | छात्रेण | 4. | उत्तमैः | छात्रैः |
| 5. | उत्तमस्य | छात्रस्य | 5. | उत्तमानां | छात्राणाम् |
| 6. | उत्तमे | छात्रे | 6. | उत्तमेषु | छात्रेषु |

NOT TO BE REPUBLISHED @KTBS

### क्रियाकलापः

**मञ्जूषायां दर्शितानि विशेष्यविशेषणानि यथोचितं प्रयुज्य वाक्यानि रचयत।**

स्थूलः

| | |
|---|---|
| गजस्य | दन्तः |
| अश्वस्य | पुच्छं |
| मित्रस्य | नासिका |

दीर्घः अस्ति ।

1. ............ ............ ............ ........... ............।
2. ............ ............ ............ ........... ............।
3. ............ ............ ............ ........... ............।

## * समुचितम् उत्तरं चित्वा मञ्जूषायां लिखत ।

1. अयं शैलः अस्माभिः पूज्यः ।

1. सह्याद्रिः 2. अरावलिः 3. हिमाचलः 4. रैवतकः

2. भारतवासिषु भेदः ईदृशः अस्ति ।

1. आभ्यन्तरः 2. बाह्यः 3. उभयतः 4. वर्णेन

3. भारतीयैः एवम् उद्घोषणीयम् ।

1. वयम् अभिन्नाः 2. वयं भिन्नाः 3. वयं स्वतन्त्राः 4. वयं वैरिणः

4. 'कुलम्' इत्यस्य पर्यायपदम् इदम् ।

1. जातिः 2. कुटुम्बः 3. अन्वयः 4. परिवारः

5. इयम् अस्मान् बध्नाति ।

1. विकृतिः 2. प्रकृतिः 3. संस्कृतिः 4. कृतिः

NOT TO BE REPUBLISHED @KTBS

**प्रहेलिका**

**क्षीये नित्यं न चन्द्रोऽस्मि न पुष्पं गन्धवानहम् ।**
**न जलं फेनयुक्तोऽपि महिलानां बहुप्रियः ॥**
**उत्तरम् - फेनकम्**

I5G8P6

## षष्ठः पाठः

# छन्दः

आचार्यः पिङ्गलः 'छन्दःशास्त्रम्' इति ग्रन्थं विरचितवान् । वेदवाङ्मयस्य षडङ्गेषु तृतीयम् अङ्गं छन्दः । अक्षरगणकं, मात्रागणकम् इति छन्दः द्विविधं वर्तते । अत्र चत्वारि छन्दांसि परिचीयन्ते ।

### ३. वसन्ततिलका

**लक्षणम्** - **'उक्ता वसन्ततिलका तभजा जगौ गः'**

**विवरणम्** - यत्र च श्लोके प्रतिपादं क्रमशः तगणः, भगणः, जगणः, जगणः, गुरु, गुरु च भवन्ति तत्र वसन्ततिलकाछन्दः भवति ।

यथा -

| _ _ ∪ | _ ∪ ∪ | ∪ _ ∪ | ∪ _ ∪ | _ _ |
|---|---|---|---|---|
| सप्राण | एव व | सतीति | विचित्र | मेतत् |
| तगणः | भगणः | जगणः | जगणः | गुरु गुरु |

### ४. मालिनी

**लक्षणम्** - **'ननमयययुतेयं मालिनी भोगिलोकैः'**

**विवरणम्** - यत्र श्लोके प्रतिपादं क्रमशः नगणः, नगणः, मगणः, यगणः, यगणः च भवन्ति तत्र मालिनीछन्दः भवति ।

यथा -

| ∪ ∪ ∪ | ∪ ∪ ∪ | _ _ _ | ∪ _ _ | ∪ _ _ |
|---|---|---|---|---|
| मनसि | वचसि | काये पु | ण्यपीयू | षपूर्णाः । |
| नगणः | नगणः | मगणः | यगणः | यगणः |

*****

@KTBS NOT TO BE REPUBLISHED

## अभ्यासः

### १. एकवाक्येन उत्तरत ।

1. छन्दःशास्त्रस्य कर्ता कः ?
2. अनुष्टुभि प्रतिपादं कति अक्षराणि भवन्ति ?
3. वसन्ततिलकावृत्ते के के गणाः भवन्ति ?
4. मालिनीवृत्ते के के गणाः भवन्ति ?
5. इन्द्रवज्रावृत्ते के के गणाः भवन्ति ?

### २. रिक्तस्थानं पूरयत ।

1. .................. भवेयुर्हि प्रतिपादमनुष्टुभि ।
2. स्यादिन्द्रवज्रा ................. तौ जगौ गः ।
3. उक्ता वसन्ततिलका .............. जगौ गः ।
4. ननमयययुतेयं .................. भोगिलोकैः ।

### ३. एतेषां श्लोकपादानां लक्षणं विलिख्य छन्दोनाम लिखत ।

1. कर्मण्येवाधिकारस्ते ।
2. प्रस्थादुदस्थात् प्रथमानवेगः ।
3. ज्योत्स्नां विनापि निवसेन्निशि शीतभानुः ।
4. निजहृदि विलसन्तः सन्ति सन्तः कियन्तः ।

NOT TO BE REPUBLISHED @KTBS

सप्तमः पाठः

# दाने सर्वं प्रतिष्ठितम्

J7Q2G1

काव्यं द्विविधं दृश्यं श्रव्यं चेति । नाटकं दृश्यकाव्येषु अन्तर्भवति। अयं भागः भासप्रणीतात् कर्णभारम् इति नाटकात् उद्धृतः । कर्णः कुन्त्या स्वजन्मवृत्तान्तं ज्ञात्वा मनसि पाण्डवविषये सोदर्यभावम्, मात्रे दत्तं वचनं, गुरोः शापवृत्तान्तं च युगपदेव विचिन्तयन् सारथिना शल्यराजेन युद्धभूमिं गच्छति। तदा विप्रवेषधरेण इन्द्रेण कर्णकुण्डलकवचानां याचनसन्दर्भः सङ्गृह्य अत्र प्रदत्तः ।

{ततः प्रविशति कर्णः शल्यराजश्च}

कर्णः – शल्यराज ! यत्रासौ अर्जुनः तत्रैव मम रथः चोद्यताम् ।

{नेपथ्ये श्रूयते}

भोः कर्ण ! महत्तरां भिक्षां याचे ।

कर्णः – अये ! वीर्यवान् शब्दः ! आहूयतां विप्रः । न न अहमेव आह्वयामि। भगवान् इतः ।

{ततः प्रविशति विप्ररूपेण इन्द्रः}

भोः कर्ण ! महत्तरां भिक्षां याचे ।

कर्णः – दृढं प्रीतोऽस्मि भगवन् । नमस्करोमि ।

इन्द्रः – (आत्मगतम् किमिति आशिषं वदामि? यदि 'दीर्घायुर्भव' इति वक्ष्ये तर्हि सः दीर्घायुः भविष्यति । यदि न वक्ष्ये मूढ इति मां विचिन्तयति । (विचार्य) हां, भवतु दृष्टम् । (प्रकाशम्) भोः कर्ण! सूर्य इव, चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यशः ।

NOT TO BE REPUBLISHED ©KTBS

कर्णः – भगवन् ! किं न वदसि दीर्घायुर्भव ? अथवा उचितम् एतदेव । यतः यश एव खलु हतेषु देहेषु मानवं जीवयति । भगवन् किमिच्छसि? किमहं ददामि ?

इन्द्रः – महत्तरां भिक्षां याचे ।

कर्णः – भगवन् ! महत्तरं काञ्चनशृङ्गं गोसहस्त्रं ददामि ।

इन्दः – गोसहस्त्रमिति ? मूहूर्तकं क्षीरं पिबामि । नेच्छामि कर्ण ! नेच्छामि ।

कर्णः – किं नेच्छसि? बहुसहस्त्रम् ते ददामि।

इन्द्रः – अश्व इति ? मुहूर्तकम् आरोहामि । नेच्छामि कर्ण ! नेच्छामि।

कर्णः – किं नेच्छसि ? गजवृन्दम् एतत्ते ददामि ।

इन्द्रः – गज इति? मुहूर्तकम् आरोहामि । नेच्छामि कर्ण ! नेच्छामि ।

कर्णः – अन्यदपि श्रूयताम् । जित्वा पृथिवीं ददामि ।

इन्द्रः – पृथिव्या किं करिष्ये ?

कर्णः – तेन हि मच्छिरो ददामि ।

इन्द्रः – अविहा ! अविहा !

कर्णः – न भेतव्यम् । न भेतव्यम् । प्रसीदतु भवान् । अन्यदपि श्रूयताम्।

अङ्गैः सहैव जनितं मम देहरक्षा
देवासुरैरपि न भेद्यमिदं महास्त्रैः ।
देयं तथापि कवचं सह कुण्डलाभ्यां
प्रीत्या मया भगवते रुचितं यदि स्यात् ।।

इन्द्रः – (सहर्षम्) ददातु । ददातु ।

कर्णः – (आत्मगतम्) अहो ! एष एव अस्य कामः । किं नु खलु कपटबुद्धेः कृष्णस्य उपायः ? सोऽपि भवतु । धिक् अयुक्तम् अनुशोचितुम् । (प्रकाशम्) भगवन् ! गृह्यताम्।

NOT TO BE REPUBLISHED @KTBS

शल्यः – अङ्गराज ! न दातव्यं, न दातव्यम् ।

कर्णः – शल्यराज ! अलम् अलं वारयितुम् । पश्य,

शिक्षा क्षयं गच्छति कालपर्ययात्
सुबद्धमूला निपतन्ति पादपाः ।
जलं जलस्थानगतं च शुष्यति
हुतं च दत्तं च तथैव तिष्ठति ।।

तस्मात् दाने सर्वं प्रतिष्ठितम् । भगवन् ! गृह्यताम् । (निकृत्य ददाति)

{निष्क्रान्तौ}

**कविकाव्यपरिचयः**

कविः – भासः ।

कालः – क्रिस्तपूर्वं चतुर्थं पञ्चमं वा शतकम् ।

देशः – दक्षिणभारतम् ।

कृतयः – कर्णभारम्, दूतवाक्यम्, अविमारकम्, पञ्चरात्रं चेत्यादीनि चतुर्दशरूपकाणि ।

NOT TO BE REPUBLISHED @KTBS

## अभ्यासः

### १. एकवाक्येन उत्तरत ।

1. विप्ररूपेण कः प्रविशति ?
2. कर्णस्य सारथिः कः ?
3. देवासुरैरपि न भेद्यं किम् ?
4. कालपर्ययात् का क्षयं गच्छति?
5. किं किं शाश्वतं तिष्ठति?

## २. रिक्तस्थानं पूरयत ।

1. आहूयतां सः ________________ ।
2. ________________ इति मां विचिन्तयति ।
3. हतेषु देहेषु ________________मानवं जीवयति ।
4. तेन हि ________________ ददामि ।
5. सुबद्धमूला निपतन्ति ________________ ।

## ३. संयोजयत ।

| | |
|---|---|
| 1. अङ्गराजः | भिक्षा |
| 2. देहरक्षा | भव |
| 3. दीर्घायुः | कवचकुण्डलानि |
| 4. महत्तरा | कर्णः |

## ४. यथानिर्देशम् उत्तरं लिखत ।

1. 'सागर इव तिष्ठतु ते यशः'

   कः पाठः ? कः अवदत् ? कम् अवदत् ?
2. 'जित्वा पृथिवीं ददामि'

   कः पाठः ? कः अवदत् ? कम् अवदत् ?

## ५. कर्णाटकभाषाया आङ्ग्लभाषया वा उत्तरं लिखत ।

1. इन्द्रकर्णयोः सम्भाषणं सङ्गृह्य लिखत ।
2. दानस्य महत्त्वविषये कर्णस्य अभिप्रायं लिखत ।

*****

© KTBS NOT TO BE REPUBLISHED

अष्टमः पाठः

# तद्धितान्तम्

तद्धितप्रत्ययान्तं पदं तद्धितान्तम् । तद्धितप्रत्ययाः प्रातिपदिकेभ्यः प्रयुज्यन्ते । संस्कृते बहूनि तद्धितान्तपदानि सन्ति। अत्र प्रसिद्धानि प्रयोगे अत्युपयुक्तानि कानिचन तद्धितान्तनामपदानि तद्धितान्ताव्ययानि च प्रदत्तानि।




@KTBS NOT TO BE REPUBLISHED

## तद्धितान्तनामपदानि

अत्र छ, म, वतुप्, इष्टन् चेति चत्वरः तद्धितप्रत्ययाः उदाहरणैः सह प्रदत्ताः।

१. **'छ' प्रत्ययः -**

अस्माकम् अयम् – अस्मदीयः ।
भवताम् अयम् – भवदीयः ।

२. **'म' प्रत्ययः -**

आदौ भवः – आदिमः ।
मध्ये भवः – मध्यमः ।

३. 'वतुप्' प्रत्ययः -

गुणः अस्य अस्तीति – गुणवान् ।

रूपम् अस्य अस्तीति – रूपवान् ।

३. 'इष्ठन्' प्रत्ययः -

अयम् अतिशयेन गुरुः – गरिष्ठः ।

अयम् अतिशयेन लघुः – लघिष्ठः

## तद्धितान्ताव्ययानि

तद्धितान्ताव्ययेषु चत्वारः भेदाः सन्ति ।

❖ **प्रकारवाचकनि**

**०१. थाल् प्रत्ययः**

तेन प्रकारेण – तथा।

येन प्रकारेण – यथा ।

❖ **कालवाचकानि**

**०२. दा प्रत्ययः**

एकस्मिन् काले – एकदा ।

सर्वस्मिन् काले – सर्वदा ।

❖ **पञ्चम्यर्थकानि**

**०३. तसिल् प्रत्ययः**

यस्मात् – यतः ।

तस्मात् – ततः ।

❖ **सप्तम्यार्थकानि**

**०४. त्रल् प्रत्ययः**

अस्मिन् – अत्र ।

अन्यस्मिन् – अन्यत्र ।

*****

@KTBS NOT TO BE REPUBLISHED

## अभ्यासः

## १. एकवाक्येन उत्तरत ।

1. तद्धितान्तं नाम किम् ?
2. तद्धितप्रत्ययाः केभ्यः प्रयुज्यन्ते ?
3. प्रातिपदिकं नाम किम् ?
4. तद्धितान्तानां भेदौ कौ ?

## २. संयोजयत ।

| | अ | आ |
|---|---|---|
| 1. | अस्माकमयं | सर्वदा |
| 2. | आदौ भवः | तथा |
| 3. | तेन प्रकारेण | आदिमः |
| 4. | सर्वस्मिन् काले | अस्मदीयः |

## ३. समूहेतरपदं चित्वा लिखत ।

| | | | | |
|---|---|---|---|---|
| 1. | भवदीयः, | मध्यमः, | गुणवान्, | ततः। |
| 2. | आदिमः, | रुपवान्, | लघिष्ठः, | सर्वदा। |
| 3. | तथा, | यतः, | अत्र, | भवदीयः। |
| 4. | एकदा, | यथा, | अन्यत्र, | अस्मदीयः। |

## ४. चतुर्थपदं लिखत ।

1. येन प्रकारेण – यथा; तेन प्रकारेण ........... ।
2. तस्मात्–तसिल् ; अस्मिन् ........... ।
3. भवताम् अयम् – भवदीयः ; आदौ भवः ........... ।
4. गरिष्ठः – इष्ठन् ; रूपवान् ........... ।

## ५. विवरणं विलिख्य प्रत्ययस्य नाम लिखत ।

1. अस्मदीयः
2. गुणवान्
3. सर्वदा
4. अन्यत्र

*****

©KTBS NOT TO BE REPUBLISHED

नवमः पाठः

# अनुवादः

J9T4U7

## ❊ कर्णाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।

5. कृषकाः ग्रामे निवसन्ति । ते क्षेत्रेषु श्रमेण कार्यं कुर्वन्ति ।

6. शिवपार्वत्योः पुत्रः गणेशः । कार्यारम्भे सर्वे गणेशं पूजयन्ति ।

7. परश्वः शालायां वार्षिकोत्सवः भविष्यति । गण्याः अतिथयः आगमिष्यन्ति ।

8. नारिकेलवृक्षः कल्पवृक्षः इति भूलोके जनाः भावयन्ति । अस्य वृक्षस्य सर्वे भागाः उपयोगाय भवन्ति ।

©KTBS NOT TO BE REPUBLISHED

## ❊ संस्कृतेन अनुवादं कुरुत ।

1. ಮಹಾಭಾರತದ ಭೀಷ್ಮ ಪರ್ವದಲ್ಲಿ ಭಗವದ್ಗೀತೆ ಇದೆ. ಇದನ್ನು ಶ್ರೀಕೃಷ್ಣನು ಅರ್ಜುನನಿಗೆ ಉಪದೇಶಿಸಿದನು.

   Bhagavadgita is in Bhishmaparva of Mahabharata. Lord Shree Krishna preached Gita to Arjuna

2. ನಗರದಲ್ಲಿ ಸುಂದರವಾದ ಉದ್ಯಾನವಿದೆ. ಆ ಉದ್ಯಾನದಲ್ಲಿ ವಿಶಾಲವಾದ ಸರೋವರವಿದೆ.

   There is a beautifull Garden in the city. There is a large lake in the garden.

3. ವಿದ್ಯಾರ್ಥಿಗಳು ಪ್ರತಿದಿನ ಶಾಲೆಗೆ ಹೋಗುತ್ತಾರೆ. ಶಾಲೆಯಲ್ಲಿ ಸಂಸ್ಕೃತ ಭಾಷೆಯನ್ನು ಕಲಿಯುತ್ತಾರೆ.

Students go to the school every day. They learn Sanskrit language in the school.

4. ಇಂದು ರವಿವಾರ, ಶಾಲೆಗೆ ವಿರಾಮವಿದೆ. ನಾಳೆ ಸೋಮವಾರ, ನಾವು ಶಾಲೆಗೆ ಹೋಗುವೆವು.

Today is Sunday, it is a holiday. Tomorrow is Monday, we go to school.

5. ಆನೆಯು ಸಸ್ಯಹಾರಿ ಪ್ರಾಣಿ. ಅದು ಕಾಡಿನಲ್ಲಿ ವಾಸಿಸುತ್ತದೆ.

Elephant is a herbivores animal. It lives in the forest.

6. ಪಕ್ಷಿಗಳು ಗೂಡಿನಲ್ಲಿ ವಾಸಿಸುತ್ತವೆ. ಅವು ಆಕಾಶದಲ್ಲಿ ಹಾರುತ್ತವೆ.
Birds live in nest. They fly in the sky.

7. ಗಾಳಿಯು ಎಲ್ಲ ಕಡೆ ಇದೆ. ಗಾಳಿಯಿಲ್ಲದೆ ಪ್ರಾಣಿಗಳು ಬದುಕಲಾರವು.

Air is everywhere. Animals can't live without air.

8. ಭಾರತೀಯ ಪರಂಪರೆಯು ವಿಶಿಷ್ಟವಾಗಿದೆ. ಅದನ್ನು ಅನುಸರಿಸೋಣ.

Indian tradition is special. Let us follow this tradition.

© KTBS NOT TO BE REPUBLISHED

*****

दशमः पाठः

# पत्राणि

Q8W7C3

## कौटुम्बिकपत्रम्

**१. अध्ययनविषये मित्रं प्रति पत्रं लिखत ।**

कुशलम् श्रीः धारवाड नगरम्

दिनाङ्कः - 6-9-2019

प्रियमित्र सादरं प्रणामाः ।

अहम् अत्र कुशलिनी । भवन्तः तत्र कुशलिनः इति भावये । मम अध्ययनं सम्यक् प्रचलति । आगामिनि मासे अर्धवार्षिकपरीक्षा भविष्यति । अतः सम्यक् पठामि । भवतः अध्ययनं कथं प्रचलति ? विरामे मम गृहम् आगच्छतु । पत्रं लिखतु ।

भवतः सखा/सखी

सुमुखः/सुप्रीता

**पत्रसङ्केतः**

मुद्रा

**सविधे -**

सिद्धेश्वरः,
सिद्धगङ्गाप्रौढशाला,
मैसूरु ।

| 4 | 5 | 0 | 0 | 0 | 5 |
|---|---|---|---|---|---|

**सकाशात् -**

सुमुखः/सुप्रीता,
कर्नाटकप्रौढशाला,
धारवाड ।

| 5 | 5 | 0 | 0 | 0 | 5 |
|---|---|---|---|---|---|

@KTBS NOT TO BE REPUBLISHED

## २. प्रवासार्थं धनं प्रेषयितुं पितरं प्रति पत्रं लिखत ।

कुशलम् श्रीः मङ्गलूरु नगरम्

दिनाङ्कः - **3-12-2019**

पूज्यपितृचरणानां साष्टाङ्गं प्रणामाः ।

अहम् अत्र कुशली । भवन्तः अपि तत्र कुशलिनः इति मन्ये ।

मम अध्ययनं सम्यक् प्रचलति । अस्माकं शालातः छात्राः मुम्बै नगरं प्रति प्रवासार्थं गमिष्यन्ति । अहम् अपि गन्तुम् इच्छामि । अतः अनुमतिं दत्वा पञ्चशतं रूप्यकाणि प्रेषयन्तु इति सविनयं प्रार्थये ।

सर्वेभ्यः नमस्काराः

भवतः पुत्रः/पुत्री

पवनः/प्रभा

**पत्रसङ्केतः**

**सविधे -** मुद्रा

चन्द्रमौलिः,
संख्या - 33, विनायकनगरम्,
बेङ्गलूरु ।

| 5 | 6 | 0 | 0 | 2 | 1 |
|---|---|---|---|---|---|

सकाशात् -
पवनः/प्रभा,
सर्वकारीयप्रौढशाला,
कुमटा ।

| 5 | 5 | 0 | 0 | 0 | 5 |
|---|---|---|---|---|---|

@KTBS NOT TO BE REPUBLISHED

एकादशः पाठः

# प्रबन्धाः

## परिसरः

L7H6E9

### संस्कृतभाषायाः गरिमा

व्यवहारस्य प्रमुखं साधनं भाषा । भाषां विना कोऽपि स्वाभिप्रायम् अन्येभ्यः प्रापयितुम् न शक्नोति । भाषया ज्ञानं वर्धते ।

जगति अनेकाः भाषाः सन्ति । तासु संस्कृतभाषा प्राचीनतमा । अस्याः देववाणी गीर्वाणी, भारती इत्यादीनि नामान्तराणि अपि सन्ति । विदेशीयाः अपि संस्कृतम् अभ्यस्यन्ति । संस्कृते आध्यात्मिकविषयेण सह भौतिकविज्ञानम् उद्योगकला इत्यादयः सर्वे विषयाः निहिताः सन्ति ।

योगशास्त्रम्, आयुर्वेदः, ज्योतिषं, विज्ञानं, तन्त्रज्ञानम् इत्यादयः विषयाः अस्याम् एव भाषायां सन्ति । वेदाः, उपनिषदः, शास्त्राणि, रामायणमहाभारतादीनि काव्यानि सर्वाणि अत्रैव विलसन्ति । संस्कृतभाषा इहपरकल्याणसाधिका । भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती ।

NOT TO BE REPUBLISHED ©KTBS

### कर्नाटकराज्योत्सवः

कर्नाटकराज्ये नवम्बर् मासस्य प्रथमदिवसः कर्नाटकराज्योत्सवः इति आचर्यते । स्वातन्त्र्यानन्तरं भारतस्य प्रदेशाः भाषादृष्ट्या विभक्ताः । क्रि. श. 1973 तमे वर्षे नवम्बर् मासस्य प्रथमे दिने 'कर्नाटकराज्यम्' इति अधिकृतघोषणा अभूत् । पूर्वं कर्नाटकराज्यस्य मैसूरुराज्यमिति नाम आसीत् । भाषाप्रदेशविभागानन्तरं कर्नाटकराज्यमिति प्रसिद्धम् अभवत् । अस्य स्मरणार्थं सर्वे कर्नाटकप्रदेशीयाः आनन्देन उत्सवम् इमम् आचरन्ति ।

अस्मिन् सन्दर्भे साहित्य-सङ्गीत-नृत्य-नाटक-विज्ञानादिषु क्षेत्रेषु विख्यातेभ्यः सर्वकारेण प्रशस्तयः प्रदीयन्ते । प्रशस्तिरियं 'कर्नाटकराज्योत्सवप्रशस्तिः'इति विख्याता वर्तते । कर्नाटके सर्वत्र ध्वजारोहणं भुवनेश्वरीपूजादिकं च कृत्वा गौरवम् अर्पयन्ति । अनेन सर्वेषां मनसि वयं सर्वे कर्नाटकीयाः इति भावना उत्पद्यते ।

@KTBS
NOT TO BE REPUBLISHED

पूरकपाठः - २

# विक्रमः वेतालश्च

संस्कृतभाषायाः कथासाहित्यं विपुलं वर्तते । प्रसिद्धेषु कथाग्रन्थेषु वेतालपञ्चविंशतिः अपि अन्यतमः । कस्यचित् भिक्षोः वचनम् अनुष्ठातुं विक्रमादित्यः वेतालम् आनेतुं श्मशानं गच्छति स्म । स च वेतालः मार्गायासपरिहारार्थं कथां कथयित्वा अन्ते प्रश्नं पृच्छति स्म । उत्तरं जानन् अपि विक्रमादित्यः यदि न वदति तदा तस्य शिरः सहस्रधा भिद्यते इति वेतालस्य समयः आसीत् । एवं वेतालोक्ताः पञ्चविंशतिं कथाः श्रुत्वा सर्वेषाम् अपि प्रश्नानां समाधानं विक्रमादित्येन उक्तम् । तासु एका कथा अत्र प्रस्तुता ।

ततः स राजा शिंशपासकाशं गत्वा तं वेतालं पुनः स्कन्धमधिरोप्य तं भिक्षुं प्रति आगन्तुम् आरेभे । गच्छन्तं च तं स्कन्धस्थितः सः वेतालः प्राब्रवीत् – राजन् ! विचित्रामेकां श्रमापहां कथां ते निवेदयामि । श्रृणु –

© KTBS NOT TO BE REPUBLISHED



पूर्वमासीत् उज्जयिन्यां धर्मध्वजो नाम नृपतिः । तिस्त्रः राजकन्यास्तस्यातिवल्लभा भार्याः आसन् । तासामेका इन्दुलेखा, द्वितीया तारावली, तृतीया मृगाङ्कवती । ताभिः राज्ञीभिः सह विहरन् राजा जिताशेषरिपुः सुखमासाञ्चक्रे ।

एकदा तत्र वसन्तोत्सवे समुपस्थिते ताभिः प्रियाभिः सह स राजा क्रीडितुम् उद्यानमगात् । तत्र अलिमालामौर्वीकाः पुष्पानताः लताः अनङ्गस्य सज्जिताश्चापयष्टीरिव पश्यन् तत्रत्यतरूपरि वर्तमानानां कोकिलानां गिरां सम्भोगैकरसस्य मनोजस्य आज्ञामिव श्रृण्वन्, वासवोपमः स राजा अन्तः पुरिकाभिः साकं कन्दर्पजीवितस्यापि जीवितं मधु सिषेवे । तत्र तस्य राज्ञः इन्दुलेखाया देव्याः केलिकचग्रहात् कर्णाग्रात् उत्सङ्गे उत्पलं पपात । तदभिघातेन च क्षते जाते अभिजाता सा महादेवी – हा ! हा ! इत्युक्त्वा मुमूर्च्छे । तदवलोक्य विह्वलेन राज्ञा परिजनेन च शीताम्बुमारुतैः समाश्वासिता सा कथञ्चित् संज्ञामवाप । अथ राजा तां राजधानीं नीत्वा भिषजां शतैर्विविधौषधैः प्रियामुपाचरत् ।

ततः स राजा रात्रौ तां सुस्थितां दृष्ट्वा द्वितीयया तारावल्या सह चन्द्रप्रासादमारुरोह । तत्र तस्य राज्ञः क्रोडसुप्तायां तस्यां गवाक्षमार्गेण हिमकरत्विषः तदङ्गेषु पेतुः । ततः क्षणात् प्रबुद्धा सा – दग्धास्मि इति वादिनी सहसा शयनादुत्तस्थौ । अथ स राजा प्रबुद्धः – किमेतत् इति सम्भ्रान्तः समुत्थाय तस्या अङ्गेषु विस्फोटान् निर्गतान् अपश्यत् । किमेतत् इति पृच्छन्तं तं तारावली राज्ञी प्राह स्म नाम – अङ्गपतितैरिन्दोः किरणैरेतत् मे कृतम् इत्युक्तवत्याः रुदत्यास्तस्यास्ताम् आर्तिं दृष्ट्वा राजा विह्वलः परिजनमाह्वयत्,

©KTBS NOT TO BE REPUBLISHED

अकारयच्च, तेन परिजनेन सजलैर्नलिनीदलैः शय्याम् अदापयच्च अङ्गेषु आर्द्रश्रीखण्डविलेपनानि ।

तावच्चास्य तृतीया महिषी मृगाङ्कवती तत्पार्श्वम् आगन्तुमना निजमन्दिरात् निरगमत् । निर्गच्छन्ती च सा क्वापि निःशब्दायां तस्यां रजन्यां विदूरे धान्यावघातजं मुसलध्वनिं शुश्राव । श्रुत्वैव सा – हा ! मृतास्मि इति वदन्ती करौ धुन्वती च व्यथिता च मार्गे एव उपाविशत् । ततः प्रतिनिवृत्यैव परिजनेन स्वमेवान्तः पुरं नीता सा बाला रुदती शयनं भेजे । तत्परिजनश्च – किमेतत् इति चिन्वन् साश्रुः आलीनभ्रमरौ पद्माविव किणाङ्कितौ तस्या हस्तौ ददर्श उवाच च गत्वा तं वृत्तान्तं राज्ञे ।

सोऽपि राजा सम्भ्रान्तः समागत्य किमेतत् ? इति तां प्रियां पप्रच्छ। सापि हस्तौ प्रदर्श्य व्यथिता प्रोवाच – नाथ ! मुसलध्वनौ श्रुतमात्र एव मे एतौ किणौ जातौ इति । ततः स राजा दाहशमनमौषधं चन्दनविलेपनादिकं तस्या हस्तयोः अदापयत् । एकस्याः उत्पलेनापि पतताक्षतम् आहितं, द्वितीयस्याः शशिकरैरपि अङ्गं दग्धं, तृतीयस्याश्चास्याः श्रुतेन मुसलशब्देन हस्तयोरीदृशाः किणा जाताः । अहो ! युगपत् एतासां मे प्रेयसीनां गुणोऽपि अभिजातत्वं दोषायैव जातः इति चिन्तयतः अन्तः पुरेषु भ्रमतस्तस्य नृपतिः सा त्रियामा शतयामामिव कृच्छ्रात् विरराम । प्रातश्च स राजा शल्यहर्तृभिर्भिषग्भिः सह तथा विधानमकरोत्, यथा अचिरात् स्वस्थान्तः पुरनिर्वृत्तोऽभवत् ।

NOT TO BE REPUBLISHED ©KTBS

इत्थमेतां कथामाख्याय वेतालः पप्रच्छ – राजन् ! एतासां का सुकुमारतरा ? यस्याः मुसले अस्पृष्टेऽपि शब्देनैव किणा उद्गताः, उत्पलेन्दुकरैः स्पर्शे जाते ययोर्व्रणनिस्फोटा वृत्ताः, ते उभे तस्याः समे न इति राज्ञो वचनमाकर्ण्य स वेतालः यथास्थानमगात् । राजा च दृढनिश्चयः पुनस्तमानेतुं सत्वरो बभूव ।

## अभ्यासः

**१. विक्रमः वेतालश्च इति पाठस्य सारांशं सङ्गृह्य कर्णाटकभाषया आङ्ग्लभाषया वा लिखत ।**

*****

@KTBS NOT TO BE REPUBLISHED

परिशिष्टम्

# चित्रकथा



१. आपणः

*** मञ्जूषायां विद्यमानपदानि उपयुज्य चित्रानुगुणं वाक्यानि रचयत।**

______________________________

______________________________

______________________________

______________________________

| |
|---|
| बालिकाः, धनम्, गृहम्, आपणिकः, अस्ति, कदलीफलानि, आम्रम्, यच्छति, पश्यति, शष्कुल्यः, पुरतः, पुस्तकम्, तिष्ठति, दृश्यते, द्राक्षाफलम्, सन्ति |



## २. उपवनम्

✻ **मञ्जूषायां विद्यमानपदानि उपयुज्य चित्रानुगुणं वाक्यानि रचयत।**

______________________________________________

______________________________________________

______________________________________________

______________________________________________

| |
|---|
| वृद्धाः, वृक्षः, मेघाः, पश्यन्ति, सस्यानि, कमलानि, पुष्पम्, दर्शयति, पर्वताः, सन्ति, मण्डपम्, उपविशन्ति, अस्ति, कोटरः, विकसन्ति, पत्रम्, सुन्दरम्, क्रीडति, विशालम्, स्मरति, बालकः, बालिका |

@KTBS NOT TO BE REPUBLISHED

# गद्यावगाहनम्

१. कस्मिंश्चित् ग्रामे कश्चन वणिक् आसीत् । तस्य गृहस्य प्राङ्गणे प्रतिदिनम् एकः काकः आगत्य तत्र पतितम् उच्छिष्टं खादति स्म । वणिजः गृहजनानां सर्वेषां तस्य काकस्य परिचयः आसीत् । कदाचित् तत्र केचन हंसाः आगताः । हंसाः वयं मानससरोवरात् उड्डयनं कुर्वन्तः आगताः इति अवदन् । तत् श्रुत्वा वणिजः गृहस्य बालकाः काकं दर्शयित्वा उक्तवन्तः । एषः काकः अपि बहुदूरम् उड्डयते। तावदेव न एषः बहुविधान् उड्डयनप्रकारान् जानाति इति ।

**अभ्यासः**

1. कस्मिंश्चित् ग्रामे कः आसीत् ?
2. काकः तत्र पतितं किं खादति स्म ?
3. कदाचित् तत्र के आगताः ?
4. 'आसीत्' इति क्रियापदं कस्मिन् लकारे अस्ति ?

@KTBS NOT TO BE REPUBLISHED

*****

२. कस्मिंश्चित् ग्रामे बहुकालपर्यन्तम् अनावृष्टिः आसीत् । भूमिः शुष्का जाता। पेयजलस्य अपि अभावः जातः । तदा जनाः दैवज्ञस्य समीपं गत्वा पृष्टवन्तः । तदा सः त्रीणि वर्षाणि वृष्टिः न भविष्यति इति उक्तवान् । तत् श्रुत्वा ग्रामवासिनः सर्वे जीवनार्थं बहुदूरं गतवन्तः । सः ग्रामः एव निर्जनः जातः ।

**अभ्यासः**

1. बहुकालपर्यन्तं कुत्र अनावृष्टिः आसीत् ?
2. कस्य अभावः जातः ?
3. जनाः कस्य समीपं गत्वा पृष्टवन्तः ?
4. दैवज्ञः कति वर्षाणि वृष्टिः न भविष्यति इति उक्तवान् ?

*****

३. कस्मिंश्चित् ग्रामे एकः काकः आसीत्। सः एकदा तृषार्तः जलम् अन्वेष्टुं गतः। एकत्र लघुभाण्डे सः जलं दृष्टवान्। परं जलम् अधोभागे आसीत्। काकः स्वचञ्च्वा जलं पातुम् अशक्तः अभवत्। परं बुद्धिमान् सः पार्श्वस्थान् शिलाखण्डान् एकैकशः गृहीत्वा भाण्डे स्थापितवान्। शिलाखण्डपूरणेन जलम् उपरि आगतम्। काकः सन्तोषेण जलं पीतवान्।

**अभ्यासः**

1. तृषार्तः काकः किम् अन्वेष्टुं गतः?
2. काकः कुत्र जलं दृष्टवान्?
3. काकः कान् जलभाण्डे स्थापितवान्?
4. कथं जलम् उपरि आगतम्?

*****

४. एकदा एकः अर्चकः कारणान्तरेण अन्यं ग्रामं गन्तुम् इच्छति। तदा पूजार्थं स्वपुत्रीं नियोजयति। सा बाला देवालयं गत्वा देवं पूजयति। पूजान्ते नैवेद्यम् अन्नं खादितुं देवं पुनः पुनः प्रार्थयते। परं देवः अन्नं न खादति। तदा सा खिन्ना भूत्वा स्वशिरः तत्रस्थपाषाणे घर्षयित्वा आत्मनं हन्तुं प्रयतते। तस्याः भक्त्या सन्तुष्टो देवः प्रत्यक्षो भूत्वा अन्नं खादति।

NOT TO BE REPUBLISHED ©KTBS

**अभ्यासः**

1. कः अन्यं ग्रामं गन्तुम् इच्छति?
2. देवः किं न खादति ?
3. बाला कथम् आत्मानं हन्तुं प्रयतते?
4. सन्तुष्टो देवः किं करोति?

# पदकोशः

| | | |
|---|---|---|
| अल्पतरम् | ಬಹಳ ಸಣ್ಣದಾದ | Very small |
| अनालस्यम् | ಕ್ರಿಯಾಶೀಲತೆ | Active |
| आत्मजः | ಮಗ | Son |
| अजः | ಆಡು | Goat |
| कुमतिः | ಕೆಟ್ಟ ಬುದ್ಧಿ | Wicked intelligence |
| कारुण्यम् | ಕರುಣೆ | Compassion |
| स्नानम् | ಸ್ನಾನ | Bath |
| भयम् | ಭಯ | Fear |
| चिरन्तनम् | ನಿರಂತರ | Eternal |
| भृत्यः | ಸೇವಕ | Servant |
| लज्जा | ನಾಚಿಕೆ | Shame |
| त्यागः | ತ್ಯಾಗ | scrifice |
| मणिः | ಮಣಿ | Gem |
| ध्यानम् | ತಪಸ್ಸು, ಧ್ಯಾನ | Meditation |
| वलयः | ಬಳೆ | Bangle |
| भिषक् | ವೈದ್ಯ | Doctor |
| करः | ಕೈ | Hand |
| स्थानिकः | ಜಿಲ್ಲಾಧಿಕಾರಿ | District Commissioner |
| अनुग्रहः | ಆಶೀರ್ವಾದ | Blessings |
| परिहारः | ಪರಿಹಾರ | Remedy |
| समयः | ಷರತ್ತು | Condition |

@KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| परित्यज्य | ಬಿಟ್ಟು | Having left / forsaken |
| सञ्जाता | ಜನ್ಮತಾಳಿದಳು | Born |
| कनीयसी | ಕಿರಿಯಳು | Junior |
| आकृष्टः | ಆಕರ್ಷಿಸಲ್ಪಟ್ಟ | Attracted |
| परिणेतुम् | ವಿವಾಹವಾಗಲು | To marry |
| निबद्धाः | ಒಳಗೊಂಡಿದೆ | Bound |
| पाषाणः | ಕಲ್ಲು | Stone |
| दधि | ಮೊಸರು | Curd |
| नवनीतम् | ಬೆಣ್ಣೆ | Butter |
| स्फुलिङ्गः | ಕಿಡಿ | Spark |
| कर्णः | ಕಿವಿ | Ear |
| पुत्थलिका | ಗೊಂಬೆ | Doll |
| ज्ञातुम् | ತಿಳಿಯಲು | To know |
| अद्य | ಇಂದು | Today |
| आमोदः | ಸಂತೋಷ | Joy |
| गरिमा | ಶ್ರೇಷ್ಠತೆ | Greatness |
| तालपत्रम् | ತಾಳೆಗರಿ | Palm leaf |
| इन्दुः | ಚಂದ್ರ | Moon |
| व्यूढः | ವಿಶಾಲ | Broad |
| प्रांशुः | ಉನ್ನತ | Lofty |
| आकारः | ಶರೀರ | Body |
| बलिः | ಕಂದಾಯ | Tax |
| अङ्गुली | ಬೆರಳು | Finger |
| समवायः | ಸಮೂಹ | Group |

©KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| पल्लवः | ಚಿಗುರು | Bud |
| अहिः | ಸರ್ಪ | Snake |
| सम्भारः | ಸಾಮಗ್ರಿ | Commodity |
| दंष्ट्रः | ದವಡೆ | Jaw |
| तालः | ತಾಳೆಮರ | Palm tree |
| पार्थिवः | ರಾಜ | King |
| निग्रहः | ದಂಡನೆ | Punishment |
| सुहृत् | ಗೆಳೆಯ | Friend |
| वातः | ಗಾಳಿ | Air |
| अप् | ನೀರು | Water |
| पर्जन्यः | ಮೋಡ | Cloud |
| ज्ञातिः | ಬಂಧು | Relative |

*****

@KTBS
NOT TO BE REPUBLISHED

## संस्कृतसम्बद्धाः संस्थाः

1. संस्कृतभारती, बेङ्गलूरु – www.samskritabharati.in
2. कर्नाटकसंस्कृतविश्वविद्यालयः, बेङ्गलूरु – www.ksu.ac.in
3. संस्कृतविकिपीडिया, बेङ्गलूरु – www.sa.wikipedia.org
4. राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः –www.rsvidyapeetha.org
5. राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली – www.sanskrit.nic.in
6. सुधर्मा संस्कृतपत्रिका, मैसूरु – sudharmasanskritdaily.com
7. संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली – http://samskritpromotion.in
8. संस्कृतानुशिक्षणम्, नवदेहली – http://samskrittutorial.in

*****

© KTBS NOT TO BE REPUBLISHED

## संस्कृतसम्पर्कजालम्

http://sanskrit.jnu.ac.in/tanalyzer/tanalyze.jsp - तिङन्तपरीक्षार्थम् ।

http://sanskrit.jnu.ac.in/tinanta/tinanta.jsp - तिङन्तनिर्माणार्थम् ।

http://sanskrit.jnu.ac.in/kridanta/ktag.jsp - कृदन्तपरीक्षार्थम् ।

http://sanskrit.jnu.ac.in/sandhi/gen.jsp - सन्धिनिर्माणार्थम् ।

http://sanskrit.jnu.ac.in/sandhi/viccheda.jsp - सन्धिपरिशीलनार्थम् ।

http://sanskrit.jnu.ac.in/subanta/rsubanta.jsp - सुबन्तपरिशीलनार्थम् ।

http://sanskrit.jnu.ac.in/subanta/generate.jsp - सुबन्तनिर्माणार्थम् ।

www.spokensanskrit.de – संस्कृताङ्ग्लशब्दकोशः।

www.srimukha.srisamsthana.org/san – संस्कृतान्तर्जालीयवार्ताः ।

*****

# आकरग्रन्थाः

## संस्कृतग्रन्थाः

1. चम्पूरामायणम् – भोजराजः ।
2. शुद्धिकौमुदी – जनार्दन हेगडे – संस्कृतभारती, बेङ्गलूरु ।
3. सन्धिः, समासः – जि. महाबलेश्वरभट्टः – संस्कृतभारती, बेङ्गलूरु ।
4. छन्दस्वती – सम्पादकः – उमाकान्तभट्टः, केरेकै ।
5. सुभाषितरत्नभाण्डागारः – डा. एस्. जगन्नाथः – बसवसमितिः, बेङ्गलूरु ।

## ಕನ್ನಡ ಗ್ರಂಥಗಳು

1. ನಾಮಲಿಂಗಾನುಶಾಸನಮ್–ವಿದ್ವಾನ್ ಎನ್. ರಂಗನಾಥ ಶರ್ಮಾ–ಕಾವ್ಯಾಲಯ, ಮೈಸೂರು.
2. ಯದುಗಿರಿದರ್ಶನಮ್ – ಸ್ಥಾನೀಕಂ ನಾಗರಾಜಯ್ಯಂಗಾರ್ – ಮೇಲುಕೋಟೆ.
3. ಗದ್ಯಗೀತಾ–ಎಂ. ಕೆ. ಪ್ರಭಾಕರ್, ಪ್ರೊ. ಎಂ. ಕೆ. ಶ್ರೀಧರ್–ಜನಪದ ಪ್ರಕಾಶನ, ಬೆಂಗಳೂರು.

@KTBS
NOT TO BE REPUBLISHED

# NOTE

@KTBS
NOT TO BE REPUBLISHED